श्रीगणेशायनमः॥अथव्रतविधिः॥द्वादश्यांलघुभुक्सन्त्रयोद
श्यांदंतधावनादिकंकृत्वाममवैधव्यादिसकलदोषपरिहारद्वाराश्री
परमेश्वरप्रीत्यर्थंवटसावित्रीव्रतमहंकरिष्यइतिसंकल्प्यनियमंकु
र्यात्॥तत्रनियममंत्रः॥त्रिरात्रंलंघयित्वाचचतुर्थेदिवसेह्यहं॥
चंद्रायार्घ्यंप्रदत्वाचपूजयित्वातथासतीं॥मिष्टान्नानियथाश
क्त्याभोजयित्वाद्विजोत्तमान्॥भोक्ष्येहंजगद्धात्रीनिर्विघ्नंकुरुमेशु
भमिति॥ततोवंशमयेपात्रेवालुकाप्रस्थंगृहीत्वासप्तधान्यभृतं
वंशपात्रं॥वस्त्रद्वयेपरिस्थापयित्वाहैमीमृन्मयींवाब्रह्मणा
सहसावित्रीप्रतिमांतत्रपूजयित्वान्यग्रोधतलेदिनत्रयमुपोषि
त्वातिष्ठेत्॥पौर्णमास्यांमृत्सर्षपैःस्नात्वासत्यवंतंसावित्रींस्वर्ण
मयींरौप्यपर्यंकेमारोप्यरौप्यरथोपरिनिवेशयेत्॥तयोरौप्यंका
ष्ठमारंवटंचैवकुर्यात्॥ततोवर्तुलमंडलेपंचामृतेनस्नापयित्वागं
धादिभिःपूजयेत्॥तत्रेत्थंपूजाविधिः॥वटसिंचामितमूलंसलिलै

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सा०पू० रम्रतोपमे॥स्त्रेणवेष्टयेद्रम्यांगंधपुष्पाक्षतैःशुभैः॥ॐनमोवैवटाय
१ त्रिशूलमयेतिप्ररेक्षिणांकृत्यवटंसंपूज्यसावित्रींपूजयेत्॥आदित्य
वर्णांधर्मज्ञांसासमालंकथंशुभांआवाहयामिसावित्रींसततंब्राह्म न
णप्रियां॥आवाहनं॥पतिव्रतेमहाभागेवह्निजातेशुचिस्मिते॥
आसनंतेमयादत्तंसावित्रीप्रतिगृह्यतां॥आसनं॥मंदाकिन्यास
मानीतंसुगंधिजलमुत्तमं॥भक्त्यादत्तंधर्मरतेसावित्रिप्रतिगृह्य
तां॥पाद्यं॥भक्त्यासमाहृतंतोयंफलपुष्पसमन्वितं॥अर्घ्यंगृह्
णसावित्रीप्रमास्यव्रतसिद्धये॥अर्घ्यं॥सुगंधिसहकर्पूरंसुरभिः
स्वादुसीतलं॥स्वपत्यासहसावित्रीकुर्यादाचमनीयकं॥आच
मनीयकं॥अथपंचामृतस्नानं॥पंचामृतंमयानीतंपयसादध
घृतंचैव॥शर्करामधुसंयुक्तंस्नानार्थंप्रतिगृह्यतां॥पंचामृतं॥ राम
मंदाकिन्याःसमानीतंहेमांभोरुहवासितं॥स्नानायतेमयाभ १
क्त्यागंगांभसीक्रियतांजलं॥शुद्धोदकस्नानं॥पाटलोशिरक

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

पूरसुरभिःस्वादु[illegible]॥ [illegible]तीयमा[illegible]र्थंस॥ [illegible]गृह्यतां॥
आचमनीयं॥स्वच्छतंतुमयंवस्त्रंकार्पासेनाविनिर्मितं॥सावित्रीस
त्यवल्कांतःउपवीतंप्रगृह्यतां॥मित्युपवितं॥कुंकुमागुरुकस्तूरि
रोचनायुतचंदनं॥हृद्यानंदनंचारुसावित्रीप्रतिगृह्यतां॥चंद
नं॥अक्षताश्चसुरश्रेष्ठाकुंकुमाक्ताःसुशोभनाः॥मयानिवेदिताभ
क्त्यागृहाणपरमेश्वरि॥अक्षता॥माल्यादीनिसुगंधीनिमाल
त्यादिनिवेप्रभो॥मयाहृतानिपुष्पाणिपूजार्थंप्रतिगृह्यतां॥पुष्पा
2 णि॥अथांगपूजा॥सावित्र्यैनमः॥पादौपूजयामि॥प्रसावित्र्यै०जा
नुनी०कमलपत्राक्ष्यै०कटिं०भूतधारिण्यै०उदरं०गायत्र्यै०कंठं०ब्र
ह्मणप्रियायै०शिरः०अथब्रह्मसत्यवतोरंगपूजा॥धात्रे०पादौ०ज्ये
ष्ठाय०उरू०परमेष्ठिने०मेढ्रं०अग्निरूपाय०कटिं०वेधसे०उदरं०पद्म
नाभाय०हृदयं०विधये०कंठं०हिरण्यगर्भाय०मुखं०ब्रह्मणे०शि
रः०विष्णवे०सर्वांगं०देवद्रुमरसोद्भूतकालागुरुसमन्वितः॥आघ्र

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सा०पू० यतामयंधूपसा[वि]त्री प्रतिगृह्यतां॥ धूपं॥ चक्षुर्दं सर्वलोकानां तिमिर
२ स्यनिवारणं॥ [आर्]त्तिक्यं कल्पितं भक्त्या गृहाण परमेश्वरि॥ दीपं॥ मो
दकापूपलड्डुकापरकोडुं[ब]...भिः॥ सघृतं पायसं नान्नं नैवेद्यं प्रतिगृ
ह्यतां॥ नैवेद्यं॥ मलयाच[ल]...[सं]भूतं कर्पूरेण समन्वितं॥ करोद्वर्तनकं चा
रु गृहाण परमेश्वरि॥ करोद्वर्तनं॥ [क]र्पूरैलालवंगादि तांबूलरत्नसंयु
तं॥ क्रमुकेण समायुक्तं तांबूलं प्रति[गृ]ह्यतां॥ तांबूलं॥ दूर्दफलमतिफलं॥
हिरण्यगर्भेति दक्षिणा॥ सावित्री च प्रसावित्री सततं ब्रह्मणप्रिये॥ ज
गत्पूज्ये ज्येष्ठमातर्विधात्रि वरदे नमः॥ सावित्री त्वं यथा देवि चतुर्वर्षश
तायुषं॥ पतिं प्रा[प्ता]सि गुणिनं मम देवि तथा कुरु॥ सावित्री प्रसावित्री च
सततं ब्रह्मणप्रिये॥ पूजितासि द्विजैः सर्वैः स्त्रीभिर्मुनिगणैस्तथा॥ त्रिसं
ध्यं देवि भक्तानां वंदनीयासि सुव्रते॥ मया दत्ता च पूजेयं त्वं गृहाण नमो यम
स्तु ते॥ इति पुष्पांजलिं॥ ओंकारपूर्वके देवि सर्वदुःखनिवारिणी॥ देवि २
मातर्नमस्तुभ्यं ममैवं प्रयच्छ मे॥ ...वेमदा...व द्विजातमुनि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

यया स्व दं जगत्सर्वं सदेवासुरमानुषं॥ सत्य व्रतधरो देव नमो॥ यमस्याध्यः॥
धर्मराजपितृपतिः साक्षी सर्वलोके जनुष्व॥ कालरूप नमो
स्मिते॥ दृढव्रते दृढमये भर्तुश्च प्रियवादिनि॥ अवैधव्यं च सौभाग्यं देहि त्वं मम सुव्रते॥ पुत्रान्पौत्रांश्च सौख्यं च गृहाणार्घ्यं नमोस्तु ते॥ इत्यर्घ्यं दद्यात्॥ अथ प्रार्थना॥ सावित्री ब्रह्मगायत्री सर्वदा प्रियभाषिणी॥ तेन सत्येन मां पाहि दुःखसंसारसागरात्॥ त्वं गौरी त्वं सची लक्ष्मी त्वं प्रभा चंद्रमंडले॥ त्वमेव च जगन्माता त्वमुद्धर वरानने॥ यन्मया दुष्कृतं सर्वं कृतं जन्मशतैरपि॥ भस्मीभवतु तत्सर्वं मे वैधव्यं च देहि मे॥ ब्रह्मसत्यवतोः प्रार्थना॥ अवियोगो यथा देव सावित्र्या सहितस्य च॥ अवियोगस्तथास्माकं भूयाज्जन्मनि॥ इति पूजाविधिः॥ ॥अथ कथा॥ युधिष्ठिर उवाच॥ श्रुतामि च हृषीकेश यच्चोक्तं भवता मम॥ तत्सावित्रीव्रतं ब्रूहि प्रसादसुमुखो भव॥ कृष्ण उवाच॥ कथयामि कुलस्त्रीणां महिम्नो वर्द्धनं परं॥ यथाचीर्णं व्रतं पूर्वं सावित्र्या राजकन्यया॥ आसीन्मद्रेषु धर्मात्मा सर्वभूतहिते रतः॥ पार्थिवो स्वपतिर्नाम पो
यम प्रार्थना ... कर्मसाद्गुण्यं ... सर्वं ... मंत्रहीनं ... एतं सर्वं
परिपूर्णं तदस्तु मे॥

गार्ध्यंधि
राजनमः
स्तु ते

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

रजानपदप्रियः॥सर्वेश्वरोनपत्यश्चसत्यवाक्संयतेंद्रियः॥सहभार्योव्र
तमिदंचचारन्नृपतिःस्वयं॥सावित्रीतिप्रसिद्धंयत्सर्वकामफलप्रदं॥
तस्मैतुष्टातदादेवीसावित्रीब्रह्मणःप्रिया॥भूर्भुवःस्वरितिस्कत्यासा
क्षान्मूर्तिरिहस्थिता॥सावित्र्युवाच॥कमंडलुकरादेवीवरदास्मितभाषि
णी॥उवाचदुहिताह्येकातवराजन्भविष्यति॥तस्याप्रसादादप्येतत्त
वसर्वंसमागतं॥मन्नाम्नासाचवक्तव्यामहाकीर्तिमतिस्तुसा॥भ
विष्यतिमहाराजमाशोकंकर्तुमर्हसि॥एवमुक्त्वातुसावित्रीजगामा
दर्शनंतदा॥कालेनागच्छताजादुहितादेवरूपिणी॥सावित्रीप्रीयता
यस्मात्सावित्र्याप्रीतयातथा॥सावित्रीसापिनाम्नाचपित्राविप्रै
श्चकल्पितं॥सावित्रीवगुणैःसम्यक्वर्द्धतेचन्नृपात्मजा॥सावित्रीसु
कुमारांगीयौवनस्थाबभूवह॥तन्वीमध्येपृथुश्रोणीप्रतिमाकांच
नीमिव॥प्राप्तेयंदेवकन्येतिदृष्टातांमेनिरेजनाः॥सातुपद्मविशा



CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ब्राह्मीमज्वलंतीवतेजसा॥चचारसापिसावित्रीदृत्तंयङ्गुणोतिथं॥
अथोपोष्यशिरःस्नातासम्यकूसंपूज्यदेवता॥हुत्वाग्निंविधिवद्वि
प्रान्वाचयित्वेंदुपर्वणि॥तेभ्यःसुमनसोमूर्द्ध्नाप्रतिगृह्यान्नपात्म
जां॥सखीपरिहृताभ्यास्यदेवश्रीरिवरूपिणी॥साभिवाद्यपितुः
पादौविनीताचारुहासिनी॥कृतांजलिवरारोहान्नृपतेःपार्श्वतःस्थि
ता॥तांदृष्ट्वायौवनप्राप्तांस्वांसुतांदेवरूपिणीं॥उवाचराजासं
मंत्र्यस्मृत्यर्थंसहमंत्रिभिः॥पुत्रीप्रदानकालस्तेनचकश्चिद्वृणातिनः
॥विचारयन्नपश्यामिवरंतुल्यमिहात्मनः॥तथापिदेयासिमया
दोषस्यादन्यथामम॥पठ्यमानंमयापुत्रिधर्मशास्त्रेषुचस्मृत॥
पितुर्गेहेतुयाकन्यारजःपश्यत्यसंस्कृता॥ब्रह्महत्यापितुस्त
स्याःसाकन्यावृषलीस्मृता॥अतोर्थंप्रेषयामित्वांकुरुपुत्रिस्वयं
वरं॥वृध्यैरमात्यैःसहिताशीघ्रंगच्छस्वमाचिरं॥वेदादीनांयथाव

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सा०क० च्यानमवेद्यंतथाकुरु॥एवमस्त्वितिसावित्रीप्रोक्ताशीघ्रंविनिर्य
४ यौ॥स्यंदनेनमहार्हेणमंत्रिभिःपरिवारिता॥तथोवनानिरम्या
णिराजर्षीणांजगामसा॥मान्यानांतत्रवृद्धानांकृत्वापादाभिवं
दनं॥ततोबभ्रामतीर्थानिपर्वतानांवनानिच॥देशांश्चविविधान्र
म्यानाश्रमान्सुमनोहरान्॥एकस्मिन्नाश्रमपदेकृतकृत्याब
भूवसा॥वरयित्वावरंसातुआजगामस्वमालयं॥सावित्रीमंत्रस
हितापरितुष्टेनचेतसा॥तत्रापश्यतदेवर्षिंनारदंपितुरंतिके॥आसि
नमासनेविप्रंप्रणम्यस्मितभाषिणी॥कथयामासतत्सर्वंप्रेम्णार
ण्यंगतासती॥सावित्र्युवाच॥आसीच्छाल्वेषुधर्मात्माक्षत्रियःपृ
थिवीपतिः॥द्युमत्सेनइतिख्यातोदैवादंधोबभूवसः॥तस्यचाप्यभ राम
वद्भार्यारुक्मिणीरूपशालिनी॥तस्यप्रतिहृतंराज्यंवैरिभिर्दैवयो ४
गतः॥सबालपतियोसार्धंभार्ययाप्रस्थितोवनं॥सतस्यवनस्य

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

रद्धःपुत्रपरमधार्म्मिकः॥सत्यवांनामरूपाढ्योभर्त्तेतिमनसाहृ
तः॥नारदउवाच॥अहोकष्टंमहोकष्टंसावित्रिकमिदंकृतं॥द्युम
त्सबालभावाद्यगुणवान्सत्यवान्नृपः॥सत्यंवदत्यसौराजा॥
सत्यवांस्तेनसंस्मृतः॥नित्यमश्वाःप्रियास्तस्यकरोत्यश्वान्समृ
न्मयान्॥चित्रेपिचालिखत्यश्वान्चित्राश्वस्तेनउच्यते॥किंव
र्ण्योरंतिदेवस्यशक्त्यादानगुणैःसमः॥ब्रह्मण्यसत्यवाक्शूरः
5 शिबिरौशीनरोयथा॥ययातिरिवचोदारःसोमवत्प्रियदर्शनः॥
अश्विनाविवरूपेणद्युमत्सेनसुतोबली॥एकोदोषोस्तिनान्योस्य
अद्यप्रभृतिसत्यवान्॥संवत्सरेणक्षीणायुर्देहत्यागंकरिष्यति
॥हृष्ठउवाच॥नारदादेतदाकर्ण्यदुहितामाहपार्थिवः॥पुत्रिसा
वित्रीगछान्यंवरंवरयसत्पतिं॥संवत्सरेणसोल्पायुर्देहत्यागंक
रिष्यति॥सावित्र्युवाच॥दीर्घायुर्वाथवाल्पायुःसगुणोनिर्गुणो॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सा०व्र० पिता॥ सद्भर्त्ता मया भर्त्ता न द्वितीयं वृणोम्यहं॥ मनसा निश्चयं कृत्वा
५ ततो वाचाभिधीयते॥ क्रियते कर्मणा पश्चादेष धर्मः सनातनः॥
नारद उवाच॥ यद्येतदिष्टं दुहितुस्ततः शीघ्रं विधीयतां॥ अविघ्नम
स्तु सावित्र्या इष्टं भद्रं करिष्यति॥ श्रीकृष्ण उवाच॥ एवमुक्त्वा खमु
त्पत्य नारदस्त्रिदिवं ययौ॥ उत्पाद्य दुःखमतुलं तस्य राज्ञो युधि
ष्ठिर॥ राजापि दुःखसंविग्नश्चिरं ध्यानपरोभवत्॥ अहो ति कष्ट
मुत्पन्नमपारं मादृशात्मनां॥ एतद्दुःखमहद्दृष्ट्वा वरमेवानपत्य
ताः॥ सत्यमुक्तं पुराणज्ञैः कन्या दुःखैकभाजनं॥ दृष्ट्वाय दुक्तं
तत्सर्वं व्यलिकं प्रतिभाति मे॥ एवं संसोच्य बहुधा धारयात्मान
मात्मना॥ स्ववासं स्मृत्य सावित्र्यायया दत्तो वरः पुरा॥ राजा स्व राम
दुहितुः सर्वं वैवाहिकमथाकरोत्॥ स्वयं गत्वा तु सामध्याय वनं मुनि ५
निषेवितां॥ द्युमत्सेन[illegible]वेदपारगं॥ समर्पयि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

त्वाकन्यांतांदत्वादासांश्चपुष्कलान्॥उवाचेदंमहाभागोव्यथिते
नांतरात्मना॥द्युमत्सेनमहाभागशृणुमेपरमंवचः॥इयंमेदुहि
तातीववल्लभाजीवितादपि॥भर्त्तासमुचितोह्यस्याःसत्यवान्सत्य
वल्लभः॥त्वमप्यस्याःसमुचितःश्वशुरोधर्मवत्सलः॥अतोपरा
धाःक्षंतव्याबालेयंराजलालिता॥यदभीष्टंचजामातुर्युवयो
र्यदभीप्सितं॥तत्तदाख्येयमस्माकंस्वस्तितेस्तुव्रजाम्यहं॥श्री
6
कृष्णउवाच॥इत्यामंत्र्यगतोराजानारदोक्तेर्व्यथान्वितः॥सावि
त्र्यपितंलब्ध्वाभर्त्तारंमनसेप्सितं॥मुमुदेतीवतन्वंगीदिवंप्रा
प्येवपुण्यकृत्॥एवंतत्राश्रमेतेषांतदानिवसतांसतां॥कालस्त
त्यस्यतांकश्चिदतिचक्रामभारत॥सावित्र्यास्तुसमानायाश्चिं
तयंत्यादिवानिशं॥नारदेनयदुक्तंतद्दृश्यानापसर्पति॥ततःका
लेबहुतीतिव्यतिक्रांतेकदाचन॥प्रातःकालेहिमर्त्तव्यःयत्रसत्यव्र

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सा०कृ० ६

तान्नपः॥ प्रोष्ठपदे सिते पक्षे द्वादश्यां रजनीमुखे॥ गणयंत्याश्च सा
वित्र्या नारदोक्तं वचो हृदि॥ चतुर्थेहनि मर्त्तव्यमिति संचिंत्य भामिनी॥
व्रतं त्रिरात्रमुद्दिश्य सावित्र्याख्यं महाफलं॥ उपोष्य संस्थिता
साध्वी सावित्री सा पतिव्रता॥ ततस्त्रिरात्रं निर्वर्त्य स्नात्वा संतर्प्य
देवताः॥ श्वश्रूः श्वशुरयोः पादौ ववंदे चारुहासिनी॥ अथ प्रतस्थे
परशुं गृहीत्वा सत्यवान्वनं॥ सावित्र्यपि च भर्त्तारं गच्छंतं पृष्ठतोन्व
गात्॥ वार्यमाणापि भर्त्रा हृदराभ्यां चापि भाषिता॥ उवाच श्वश्रू
मा भद्रे गच्छ कंटकितं वनं॥ सुकुमारासि कल्याणि तलालिता पृ
थिवी मता॥ अपदाहापदे स्यां तं कथं शक्ष्यसि तद्वनं॥ उपवासा
त्त्रयस्तेद्य तस्मात्स्थेय सुमध्यमे॥ सावित्र्युवाच॥ नैष धर्मो वरस्त्री राम
णाय कर्त्तेरिव मुक्षिते॥ स्वयमेव च भोक्तव्यं मिथ्याकुर्धर्मदर्शि ६
नः॥ अपरं कौतुकं मेस्ति वनस्याद्य प्रदर्शने॥ भर्त्रा सह मयाद्या

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

मिसख्यास्यामिनोचिरं॥युष्मत्पादप्रसादेनमानिषेधंकरिष्यथः
॥ततोज्ञात्वाचसाबालाजगामाथपतिव्रता:॥सावित्र्यनुपदंभ
र्तुर्वनेतस्मिन्मनोरमे॥गत्वासोदूरमध्वानंजग्राहाथफलादि
कं॥समित्कुशंचकुसुमंभार्ययासंवदन्प्रियं॥काष्ठंकुठारेणत
थापाटयामाससलीलया॥अथपाटयतस्तस्यजातासिरसिवे
दना॥ततःसंत्यज्यतत्सर्वंवटछायामुपाश्रितः॥सत्यवान्वदनक्रां
तःकिंचिद्घूर्णितमानसः॥वटशाखामवष्टभ्यसत्यवान्प्राहगद्ग
दं॥सावित्रियस्याशिरसिवेदनामांप्रबाधते॥नचकिंचित्प्रप
श्यामिभ्रमतिबाहिमेमनः॥नचोत्संगेक्षणंतावत्स्वप्तुमिच्छामिसुं
दरि॥विश्रमस्वमहाबाहोसावित्रीप्राहदुःखिता॥पश्चादपिग
मिष्यामिआश्रमंसुसुखोदयं॥यावदुत्संगगंकृत्वाशिरआस्ते
महीतले॥तावत्करालवदनायातयोधसहस्रशः॥आजग्मुर्य

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सा०क० भृताश्चरौद्राश्चातिभयंकराः॥नशेकुदृष्टिपातेनसावित्र्यास्त्रातुमं
७ तिके॥गत्वात्वचक्षुतत्सर्वंसावित्र्यास्तेयमद्भुतं॥दृष्टिपातेननास्मा
भिःशक्यतेस्याःप्रबाधितुं॥दहतीवचनोरेहंदृष्टिपातेनसासती
॥तत्स्वयंप्राहिनोस्माभिःसाध्यतेसत्यवान्क्वचित्॥इत्याकर्ण्यय
मःकोपादुत्थायाथवरासनात्॥आरुह्यमहिषंरौद्रंरौद्रपापहरो
बली॥आजगामत्वरायुक्तोयत्रास्तेसापतिव्रता॥सावित्र्यपि
चसंत्रस्तावीक्ष्यमाणाइतस्ततः॥सावधानाकथंकोयंभर्त्तारंमम
नेष्यति॥तावद्ददर्शभालापुरुषंकृष्णपिंगलं॥किरीटिनंपीतवस्त्रं
साक्षात्सूर्यमिवोदितं॥तमुवाचाथसावित्रीप्रणम्यमधुराक्षरं॥
कस्त्वंदेवोथदैत्योवागंधर्वपितुमागतः॥नचाहंकेनचिच्छक्या राम
स्पधर्मादेवरोचिता।पुष्टंवापुरुषश्रेष्ठदीप्तांवह्निशिखामिव॥ ७
यमउवाच॥यमःसंयमनेनश्चाहंसर्वभूतभयंकरः॥क्षीणायुरेष

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तेभर्त्तासन्निधौतेपतिव्रते॥नशक्यः किंकरैर्नेतुंततोहंस्वयमा
गतः॥शरीरात्पाशसंयुक्तंपृथग्भूतंमहाद्युतिः॥अंगुष्ठमात्रं
पुरुषंनिचकर्षयमोबलात्॥अथप्रयातुमारेभेपंथानंपितृसे
वितं॥सावित्र्यापिवरारोहाद्रुत्वापादेनमंडलं॥रक्षार्थंभर्त्तृका
मस्ययथावनुपद्रुतः॥पतिव्रतातदाश्रांताध्यायमानानि
जंपतिं॥नश्चितातद्गतप्राणातामुवाचयमस्तदा॥निवृत्यगच्छ
8 सावित्रिसुंदरंत्वमिहागताः॥एषमार्गोविशालाक्षिनकेना
प्यनुगम्यते॥सावित्र्युवाच॥नश्रमोनचमेग्लानिःकदाचिद
पिजायते॥भर्त्तारमनुगच्छंत्यास्तववसिष्ठस्यसन्निधौ॥सतांस
तांगतिर्नान्यास्त्रीणांभर्त्तासदागतिः॥वेदोवर्णाश्रमाणांच
शिष्याणांचगतिर्गुरुः॥सर्वेषामेवजंतूनांस्थानमस्तीमहीत
लमुक्त्वाभर्त्तारमेकंतुस्त्रीणांनान्यसमाश्रयः॥एभिरन्यैस

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सा०क० मुनिवैर्वाक्यैर्धर्मार्थसंयुतैः॥ ततः पितोधर्मराजस्तकसावित्रीमिदम्
८ ब्रवीत्॥ तुष्टोस्मितवभद्रंतेवरान्वरयसुव्रते॥ सान्वचवेवरान्पंच
विनयावनतासती॥ चक्षुःप्राप्तिंतथाराज्यंश्वशुरस्यमहात्मनः॥
जीवितंचतथाभर्तुर्धर्मसिद्धिंश्चशाश्वतीः॥ पितुःपुत्रशतंचैवतनया
चश्चात्मनः॥ धर्मराजेवरान्दत्वाप्रेषयामासतांततः॥ आज
गामाथसातन्वीन्यग्रोधविटपंतदा॥ कृत्वोत्संगेशिरस्तस्यपूर्व
वन्निषसादसा॥ गात्रसंवाहनंचक्रेभर्तुर्वातस्यभारत॥ उत्थितश्च
ततोप्राप्यनिरुक्रमाहरमाहरात्॥ कथंनबोधितोभद्रेकालोति
वगतोमम॥ किंमांवक्ष्यतिमेताततःकिंचमानासुदुःखिता॥ विरु
द्धश्चयसंजातंकालोतीवगतोवने॥ विहायमातापितरौकालो राम
नक्वापिमेत्यगात्॥ सावित्र्युवाच॥ कथंत्वांबोधयाम्यत्रपीडित ८
तुशिरोरुजा॥ ममैवात्रविलंबोभूदकार्येणातवानघ॥ प्रहस्या

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

त्यायसावित्रीजग्राहशिरसेंधनं॥समित्कुशादिकंसोथजग्मतु
स्तौस्वमाश्रमे॥ततःपित्रास्वनेत्राभ्यांदृष्टौतौपरयामुदा॥आ
लिंग्यमूर्ध्नुपाघ्रायपुत्रमंकेनिवेश्यसः॥उवाचदिष्ट्यापश्यामि
सभार्यंत्वांसमागतं॥विलंबकारणंपृष्टःसमाचष्टेयथातथं॥वि
दितार्थोतिसंहृष्टःपूजयामासतांसती॥अवापपूर्वजेर्मुक्तंराज्यं
१ विहितकंटकं॥द्युमत्सेनोमहाभागइयाजक्रतुभिस्तदा॥ततोश्वप
तिरासाद्यपुत्रानात्मगुणाधिकान्॥सावित्र्याश्चेष्टितंज्ञात्वाजा
मातुश्चवितंतथा॥राज्यप्राप्तिंचविपुलान्परांमुदमवापसः॥
सावित्र्याख्यानकमिदंसर्वपापप्रणाशनं॥अवैधव्यंप्रदंस्त्री
णांस्वर्गमोक्षप्रदायकं॥सुखसौभाग्यदंपार्थश्रोतव्यमिदंस
दा॥भाद्रपदेपौर्णिमायामासुचीर्णंव्रतंत्विदं॥महात्म्यमस्यन्र
पतेकथितंसकलंमया॥युधिष्ठिरउवाच॥कीदृशंतद्व्रतंकृष्ण

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सा०उ० सावित्र्यापरनुष्ठितं॥तस्मिन्भाद्रपदेमासिविधानंतस्यसंसमे॥का
९ स्ववताव्रतेतस्मिन्कोमंत्र:किंफलंविभो॥एतदाख्याहिमेनाथनहि
तृप्यामिमाधव॥श्रीकृष्णउवाच॥श्रूयतांपांडवश्रेष्ठसावित्री
व्रतमादरात्॥कथयामियथाचीर्णंतयासत्यायुधिष्ठिर॥त्रयोद
श्यांभाद्रपदेदंतधावनपूर्वकं॥त्रिरात्रंनियमंकुर्यादुपवासस्यभ
क्तितः॥अशक्तश्चत्रयोदश्यांनक्तंकुर्याज्जितेंद्रियं॥अयाचितंच
तुर्दश्यांपौर्णिमास्यामुपोषणं॥नित्यंस्नात्वामहानद्यांतडागेनि
र्झरेपिवा॥विशेषतःपौर्णमास्यांस्नानंसर्षपमृज्जलैः॥गृहीत्वा
वालुकापात्रेप्रस्थमात्रांयुधिष्ठिर॥अथवाधान्यमादाययवशा
लितिलादिकं॥ततोवंशमयेपात्रेवस्त्रयुग्मेनवेष्टिते॥सावित्री राम
प्रतिमांकृत्वाब्रह्मणश्चैवशोभनं॥सौवर्णींमृन्मयींवापिस्वशक्त्या ९
रौप्यनिर्मितां॥ब्रह्मरूपानिर्माणंतुविष्णुधर्मोत्तरेभिहितं॥पंचाप

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

वे त्स्वँशमतत आविशात्।।गोरिण्याभोजयेद्भक्त्याहविष्यान्नेनसं
स्कृतः।पुष्पैःकुंकुमसिंदूरैस्तालवैःकंठसूत्रकैः॥वासोभिर्भू
षणैःशक्त्यावित्तशाठ्यविवर्जितः॥विसर्जयेत्ततस्तांश्चसा
वित्रीप्रीयतामिति।।वक्तव्यंब्राह्मणैःसर्वैस्तस्मैभुक्तोत्तरंभृशं
।।सावित्रीवरदातुभ्यंभवतुतवसुव्रते।।व्रतंचसुव्रतंतद्धिवि
धानेननिश्चितं॥ ।।इतिभविष्योत्तरोक्तंब्रह्मसावित्रीव्रतं॥ ॥

पो० श्री रामैं०पु०

10

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham